# O. P. JINDAL SCHOOL, SAVITRI NAGAR

## Half Yearly Examination (2018 – 2019)

Class: IX MM: 80

Subject: Sanskrit Time: 3 Hrs.

Name: ____________________ Class / Section: ________ Roll No.:__________

***Fifteen Minutes Extra will be for reading the Question Paper.***

निर्देशाः१) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | पठित अवबोधनम् | (५ अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (१५ अङ्काः) |
| खण्ड ग | अनुप्रयुक्तव्याकरणम् | (२५ अङ्काः) |
| खण्ड घ | पठित-अवबोधनम् | (३५ अङ्काः) |

२) सर्वे प्रश्नाः अनिवार्याः।

३) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

४) प्रश्नसंख्या अवश्यं लेखनीया।

५) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

### (खण्ड-क) पठित अवबोधनम्

**प्र० १ अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

शिक्षायाः महत्त्वं सर्वेषां एव विदितं शिक्षामन्तरेण न केषामपि सत्कार्यप्रवृत्तिः संभवति। जनः कर्तव्या कर्तव्ययो विवेकं कर्तुं शिक्षया एव समर्थो भवति। शिक्षां विना जनः अन्धवत् एव कार्येषु प्रवर्तते। शिक्षाविहीनो मूर्खः नाद्रियते लोकैः। धनार्जनायः न क्षमते कुटुंबभरणाय। स्वोदरदरीपूर्तये वा। शिक्षाविहीनः नरः पशुतुल्यो भवति। वस्तुतः मनुष्यस्य जीवनम् शिक्षाम् विना निरर्थकम् एव भवति। मनुष्यस्य शोभा तु शिक्षया एव भवति। शिक्षा मनुष्यस्य रक्षा पदे-पदे माता इव च हितकार्ये नियुक्तम् पिता इव करोति।

**क) एकपदेन उत्तरत –** (½x२=१)

**अ** शिक्षा विहीनः नरः कीदृशः भवति ?

**ब** सत्कार्य प्रवृतिः कथं भवति ?

**ख) पूर्णवाक्येन उत्तरत–** (१x२=२)

**अ** शिक्षा मनुष्येभ्यः किं-किं करोति ?

**ब** जनः शिक्षया किं-किं कर्तुम् समर्थः भवति ?

**ग) प्रदत्त विकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत–** (½x४=२)

अ शिक्षा विहीनः नरः पशुतुल्य भवति। अत्र कर्तृपदं किं ?

i शिक्षाविहीनः ii नरः

iii पशु iv पशुतुल्यः

ब 'सार्थकम्' इति पदस्य विपरीतार्थकम् किं ?

i निरर्थकम् ii निरर्थकमेव

iii समर्थः iv जीवनम्

स 'शिक्षाविहीनो' इति विशेषण पदस्य विशेष्य पदं किम् ?

| | | | |
|---|---|---|---|
| i | लोकैः | ii | मूर्खः |
| iii | शिक्षाम् | iv | नाद्रियते |

द 'शिक्षायाः महत्त्वं सर्वेषां एव विदितम्' अत्र अव्यय पदं किम् ?

| | | | |
|---|---|---|---|
| i | एव | ii | महत्त्वम् |
| iii | विदितम् | iv | शिक्षाविहीनो |

## (खण्ड-ख) रचनात्मकं कार्यम्

**प्र० २** मंजूषायाम् प्रदत्तैः उचित पदैः अधोलिखितम् पत्रम् पूरयत- **(½X१०=५)**

निजभ्रातुः विवाहे सम्मिलितार्थे प्राचार्यम् प्रति अधोलिखिते अवकाशपत्रे रिक्तस्थानानि मंजूषायां प्रदत्तपदानां सहायतया पूरयत।

-------------------(१)
श्रीमंत प्रधानाचार्य महोदयाः
ओ० पी० जिंदल विद्यायलयः
सावित्रीनगरम् तमनारः।

विषयः- अवकाश प्रदानार्थम् -------------------(२)।
-----------(३)

सविनयम् ------------(४) इदमस्ति यत् अहं ----------(५) विद्यालये नवम् ---------(६) छात्रोऽस्मि। -----------(७) मम भ्रातुः विवाहः अस्ति। अतः अहं अद्य विद्यालयं आगन्तुम् न ------(८)।

कृपया माम् ----------(९) अवकाशं स्वीकृत्य ---------(१०) भवन्तः ।

| |
|---|
| कक्षायाः, अद्य, अनुग्रहीष्यन्ति, सेवायां, महोदयाः, निवेदनम्, भवतः, शक्नोमि, एकदिवसस्य, आवेदनपत्रम्। |

**प्र०३ मंजूषायाम् प्रदत्त शब्दानाम् सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत-(१X५=५)**

| |
|---|
| प्रातःकालः, रमणीयबेला, स्वास्थ्य, स्फूर्तिदायकः, सूर्योदयः, प्रदूषणरहितम्, एकः, दृश्यते, अस्ति, वृक्षौः गृहाणि, नदी, जलम्, वहति। |



**प्र० ४ अधोलिखितानाम् वाक्यानाम् संस्कृतेन अनुवादः क्रियताम्-** **(१X५=५)**

**क)** यह मेरा विद्यालय है।
**ख)** बंदर वृक्ष पर चढ़ता है।
**ग)** हम नेत्रों से देखते हैं।
**घ)** गुरु को नमस्कार।
**ङ)** गाँव से बाहर वन है।

**(खण्ड-ग) अनुप्रयुक्तव्याकरणम्**

**प्र०५(i) उचितम् वर्णनं चित्वा वर्णवियोजने रिक्तस्थानम् पूर्तिं कुरुत-** **(½X२=१)**

क्षत्रियः = क् + -- + अ + त् + र् + इ + य् + अः ।

(क) स् (ख) श्

(ग) ष् (घ) क्ष

चन्द्रः = च् + अ + न् + द् -- + अः।

(क) ऋ (ख) र्

(ग) द (घ) अ

**(ii) अधोलिखितम् प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत-** **(१X२=२)**

कः वर्णः तालव्य अस्ति ?

(क) ट् (ख) द्

(ग) त् (घ) च्

कः वर्णः दन्त्य अस्ति ?

(क) ब् (ख) भ्

(ग) फ् (घ) ल्

**प्र० ६ अधोलिखित वाक्येषु स्थूल पदानाम् समुचितं संधि-विच्छेदं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत-** **(१X४=४)**

**i** **यथेष्टम्** कार्यम् कुरु।

(क) यथा + इष्टम् (ख) यथा + एष्टम्

(ग) यथ + इष्टम् (घ) यथ + एष्टम्

**ii** **इत्युक्तः** पिता तत्वज्ञानम् प्रतिपादयति।

(क) इति + उक्तः (ख) इति + युक्तः

(ग) इत + युक्तः (घ) इत्य + उक्तः

**iii** **दिगम्बराणाम्** रथयात्रा गच्छति।

(क) दिग + अम्बराणाम् (ख) दिक् + अम्बराणाम्

(ग) दिगम् + बराणाम् (घ) धिक् + अम्बराणाम्

iv इदानीम् **ग्रीष्म + ऋतु** अस्ति।

(क) ग्रीष्मः तु (ख) ग्रीष्मर्तु

(ग) ग्रीष्मार्तु (घ) ग्रीष्पार्तु

**प्र० ७ उचित शब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत-** **(१X६=६)**

i श्री रामः --------- पुत्रः अस्ति।

(क) राजस्य (ख) राज्ञः

(ग) राजा (घ) राजे

ii अहम्-------- एकम् रुप्यकम् ददामि।

(क) तम् (ख) तेन्

(ग) तस्मै (घ) तस्मात्

iii सा ---------- नमति।

(क) पिता (ख) पितरं

(ग) पितुः (घ) पित्रे

iv ----------- दत्तम् क्षीरं मधुरम् अस्ति।

(क) अहम् (ख) मयि

(ग) मम (घ) मया

v उद्याने ------ लताः सन्ति।

(क) चतुरः (ख) चत्वारः

(ग) चतस्त्र (घ) चत्वारि

vi भीष्मः -------- पुत्रः आसीत् ?

(क) गंगा (ख) गंगाम्

(ग) गंगायाः (घ) गंगाः

**प्र० ८ उचित धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत-** **(१X३=३)**

i वानराः कदलीफलानि -----।

(क) भक्षन्ति (ख) भक्षयन्ति

(ग) भक्षयतः (घ) भक्ष्यथः

ii महिलाः जलं ---------।

(क) आनयथः (ख) आनयन्ति

(ग) आनयामि (घ) आनयति

iii ते एकम् सुन्दरम् चित्रं ---------।

(क) लभते (ख) लभसे

(ग) लभे (घ) लभेते

प्र० ९ **अधोलिखितवाक्येषु प्रदत्त विकल्पेभ्यः उचितम् पदम् चित्वा लिखत–** (१X४=४)

i इदं-------- परितः राजपथम् वर्तते।

(क) विद्यालयस्य (ख) विद्यालयात्

(ग) विद्यालयम् (घ) विद्यालयेन्

ii कृष्णः -------------- अलम्।

(क) कंसम् (ख) कंसेन्

(ग) कंसात् (घ) कंसाय

iii ----------- पूरतः सेना-संचालकः अस्ति।

(क) सेनाम् (ख) सेनायाः

(ग) सेनायै (घ) सेनया

iv ----------- फलानि रोचन्ते।

(क) शिशुः (ख) शिशोः

(ग) शिशुभ्यः (घ) शिशुना

प्र० १० **प्रदत्त विकल्पेभ्यः उचितानि प्रत्ययाः उत्तराणि चित्वा लिखत–** (१X३=३)

i महापुरुषाः जनान् ---------- प्रसीदन्ति। (उप + कृ + ल्यप्)

(क) उपकृत्य (ख) उपकार्य

(ग) अपकृत्य (घ) उपकाराय

ii पुस्तकं ----- मोहितः पठति। (लब्धवा)

(क) लभ् + क्त्वा (ख) लब + क्त्वा

(ग) लभ्ध + क्त्वा (घ) लभि + त्वा

iii प्रदर्शनीम् ------- वयं गमिष्यामः। (दृश् + तुमुन्)

(क) दृश्तुम् (ख) द्रष्टुम्

(ग) द्रस्तुम् (घ) दर्शितुम्

प्र० ११ **प्रदत्त कोष्ठकेभ्यः उचितम् उपसर्गम् चित्वा लिखत–** (½X४=२)

i शिक्षकः विद्यालयात् ---------। (निर्गच्छति, निर्गच्छन्ति, निर्गच्छतः)

ii पक्षिणः गगने ------ । (उड्डयते, उड्डयन्ते, उड्डयेते)

iii सैनिकः शत्रून् ----------। (पराजयति, पराजयते, पराजयन्ते)

iv गंगा हिमालयात् -------- । (प्रभवति, प्रभवतः, प्रभवन्ति)

**(खण्ड-घ) पठित अवबोधनम्**

**प्र० १२ अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितान् प्रश्नानाम् उत्तराणि लिखत–**

भ्रान्तः कश्चन् बालः पाठशाला गमनं वेलायाम् क्रीडितुम् निर्जगाम्। किंतु तेन सह केलिभिः कालं क्षेप्तुं कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतस्ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालय

गमनाय त्वरमाणा बभूवुः। तंद्रालु बालोः लज्जया तेषां दृष्टिपथमपि परिहरन् एकाकी किमपि उद्यानम् प्रविशेश। स चिन्तयामास- विरमत्वेते वराकाः पुस्तकदासाः। अहं पुनरात्मानां विनोदयिष्यामि। ननु भूयो द्रक्षामि क्रुद्धस्य उपाध्यायस्य मुखम्। सन्त्वेते निष्कुटवासिनः एव प्राणिनो मम वयस्य इति।

**i एक पदेन उत्तरत-** (१X२=२)

क बालः एकाकी एव कुत्र प्रविशेश ?

ख बालः कीदृशः आसीत् ?

**ii पूर्णवाक्येन उत्तरत-** (२X१=२)

क बालकस्य वयस्याः किमर्थम् त्वरमाणाः बभूवुः ?

**iii उचितम् उत्तरम् चित्वा लिखत-** (१X२=२)

क 'निर्जगाम' इत्यस्य क्रियापदस्य कर्तृपदम् किम् ?

(अ) भ्रान्तः (ब) कश्चन्

(स) बालः (द) पाठशाला

ख 'क्रीडाभिः' इत्यस्य पदस्य अर्थे किं पदं प्रयुक्तम् ?

(अ) केलिभिः (ब) तंद्रालुः

(स) क्रीडितुम् (द) किमपि

**प्र० १३ अधोलिखितम् श्लोकम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत-**

पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः ।।

**i एकपदेन उत्तरत-** (१X२=२)

क सतां विभूतयः किमर्थं भवन्ति ?

ख के जलम् न पिबन्ति ?

**ii पूर्णवाक्येन उत्तरत-** (२X१=२)

क वारिवाहाः किम् न कुर्वन्ति ?

**iii उचितम् उत्तरम् चित्वा लिखत-** (१X२=२)

क 'वृक्षाः', इति कर्तृपदस्य क्रियापदम् किम् ?

(अ) पिबन्ति (ब) खादन्ति

(स) आदन्ति (द) नादन्ति

ख 'मेघाः', इत्यर्थे किम् पदम् प्रयुक्तम् ?

(अ) वारिवाहाः (ब) विभूतयः

(स) अम्भः (द) नाम्भः

**प्र० १४ अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

*(ततः प्रविशति करतलाभ्यं चक्षुषी मार्जयन्ती पंचवर्षदेशीयाः बालिका सोमप्रभा)*

**विमला–** अये जागरिता। त्वरस्य तावत्। परिहीयते विद्यालय गमनवेला।

**सोमप्रभा–** अम्ब ! अद्य न गमिष्यामि विद्यालयं।

**विमला–** *(हस्तेन सोमप्रभाम् गृहीत्वा)* अयं किमेतत् कथयसि ? विद्यालयस्तु गन्तव्य एव प्रतिदिनम्। *(सोमप्रभायाः प्रस्थानम्)*

**श्वश्रूः –** विमले ! अयि दृष्टे ! कुत्र मृतासि ? कियतः कालात् शब्दापयामि ?

**विमला–** *(सकरुणम् निशम्य)* इयं मम श्वश्रूः सदैव मर्माघातिभिः कटुवचनैराक्षिपति माम्। *(उच्चैः स्वरेण)* अम्ब ! इयं आगच्छामि। किम् करणीयम् ?

**i एकपदेन उत्तरत–** **(१X२=२)**

क कस्याः श्वश्रूः कटुवचनैः आक्षिपति ?

ख बालिका कति वर्षीयाः आसीत् ?

**ii पूर्णवाक्येन उत्तरत–** **(२X१=२)**

क सोमप्रभा किम् कुर्वन्ती प्रविशति ?

**iii उचितम् उत्तरम् चित्वा लिखत–** **(१X२=२)**

क 'आक्षिपति', इत्यस्य क्रियापदस्य कर्तृपदम् किम् ?

(अ) मम (ब) श्वश्रूः

(स) मर्मः (द) घातिभिः

ख 'इयम् आगच्छामि', अत्र 'इयम्' सर्वनाम पदं कस्मै प्रयुक्तम् ?

(अ) विमलायै (ब) सोमप्रभा

(स) श्वश्रूः (द) न केनपि

**प्र० १५ अधोलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **(१X५=५)**

**क** <u>सरसाः</u> रसालाः लसन्ति।

**ख** ग्रामे <u>निर्धना</u> वृद्धा न्यवसत्।

**ग** जीमूतवाहनः <u>महान् दानवीरः</u> आसीत्।

**घ** वृत्तम् <u>यत्नेन</u> संरक्षेत्।

**ङ** <u>ग्रामात्</u> बहिः पिप्पल वृक्षः आसीत्।

**प्र० १६ A निम्नलिखित श्लोकयोः अन्वयं पूरयत–** **(½X४=२)**

प्रिय वाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ?

**अन्वयः –** सर्वे ----- प्रियवाक्यप्रदानेन ---- । तस्माद् तत् ------ वक्तव्यं वचने -----

दरिद्रता।

**B** योमामं पुत्रप्रीत्य पोषयति स्वामिनो गृहे तस्य। (½X४=२)

रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि।। इति।।

**अन्वयः** - यो स्वामिनः ------ पुत्रप्रीत्या पोषयति ----- गृहे रक्षानियोगकारणात् मया --- अपि ----- भ्रष्टव्यम् ।

**प्र० १७ अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत-** (½X८=४)

**क)** नैतादृशः स्वर्णपक्षः रजतचंचु स्वर्णकाकस्तया पूर्वं दृष्टः।

**ख)** पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्।

**ग)** स्वर्णसोपानेन सा स्वर्ण- भवनमाससाद।

**घ)** ताम्रस्थाल्यां एव अहम् निर्धना भोजनम् करिष्यामि।

**ङ)** तस्यां महार्हाणि हीरकाणि विलोक्य सा प्रहर्षिता।

**च)** नैतादृक स्वादु भोजनम् अद्यावधि बालिका खादितवतीः।

**छ)** लुब्धया बालिकया लोभस्य फलं प्राप्तम्।

**ज)** गर्वितया बालिकया प्रोक्तम्-स्वर्णमयेन सोपानेन अहम् आगच्छामि।

**प्र० १८ अधोलिखितवाक्येषु रेखांकितपदानाम् कृते उचितमर्थं चित्वा लिखत-** (१X४=४)

क वृद्धायाः <u>दुहिता</u> विनम्रा आसीत्।

(अ) पुत्री (ब) पुत्रः

(स) दुग्धं (द) धेनुः

ख तत्र स्वर्णमयः <u>प्रासादः</u> आसीत्।

(अ) राजभवनम् (ब) मिष्ठान्नम्

(स) प्रसादम् (द) प्राप्तम्

ग एताम् <u>महानासं</u> नयतु।

(अ) पाठशालाम् (ब) पाकशालां

(स) भवनम् (द) देवालयम्

घ यत्नेन <u>वृत्तम्</u> रक्षेत्।

(अ) चरित्रम् (ब) विकारम्

(स) अन्नम् (द) धनम्

---००---